## दशमः पाठः

# महर्षिः पाणिनिः



**रमणः** — अइउण् .......... हल्

**हरिकृष्णः** — भ्रातः! किं पठसि? वेदघोष इव श्रूयते।

**रमणः** — माहेश्वरसूत्राणि पठामि।

**हरिकृष्णः** — एतानि सूत्राणि महेश्वरेण रचितानि किम्?

**रमणः** — शिवताण्डवसमये महेश्वरस्य ढक्कातः निस्सृतानि सूत्राणि एतानि। एवं महेश्वरात् आगतानि सन्ति, अतः माहेश्वरसूत्राणि इति कथ्यन्ते। पाणिनिना रचितानि सन्ति।

**हरिकृष्णः** — कः अयं पाणिनिः।

**रमणः** — पाणिनिः संस्कृतव्याकरणस्य नियमानां रचयिता।

**हरिकृष्णः** — व्याकरणस्य नियमाः के?

**रमणः** — प्रायः 4000 व्याकरणनियमाः सन्ति। तान्येव पाणिनीयसूत्राणि इति कथ्यन्ते। एतेषां सूत्राणां सङ्ग्रहग्रन्थः एव 'अष्टाध्यायी' इति।

**हरिकृष्णः** — किम् अत्र अष्ट अध्यायाः सन्ति?

**रमणः** — आम्! अत्र अष्ट अध्यायाः सन्ति। प्रत्येकस्मिन् अध्याये चत्वारः पादाः भवन्ति। आहत्य प्रायः 4000 सूत्राणि।

**हरिकृष्णः** — अग्रज! पाणिनेः जन्मविषये ज्ञातुम् इच्छामि।

**रमणः** — पाणिनेः जन्म वर्तमानपाकिस्तानस्य शलातुरग्रामे अभवत्। सः ग्रामः तक्षशिला नगरस्य समीपे अस्ति। तक्षशिला विश्वविख्यातम् अध्ययनकेन्द्रमासीत्।

**हरिकृष्णः** — पाणिनेः कालः कदा आसीत्?

**रमणः** — विद्वांसः वदन्ति पाणिनेः कालः प्रायः ईसा पूर्वं 520 तः 460 पर्यन्तम् आसीदिति।

**हरिकृष्णः** — पाणिनेः मातापित्रोः नाम किम्?

**रमणः** — मातुः नाम दाक्षी, पितुः नाम पाणी इति। सोऽयं दाक्षीपुत्रः पाणिनिः एव महावैयाकरणः त्रिषु मुनिषु अन्यतमः अस्ति।

**हरिकृष्णः** — त्रयः मुनयः के?

**रमणः** — प्रथमः सूत्रकारः पाणिनिः द्वितीयः वाक्यकारः वररुचिः तृतीयः तु भाष्यकारः पतञ्जलिः इति एते त्रयः मुनयः व्याकरणस्य प्रवर्तकाः।

**हरिकृष्णः** — भ्रातः! व्याकरणं नाम किम्?

**रमणः** — व्याकरणं नाम एकं विशिष्टं शास्त्रम् अस्ति। यत्र बहुविशिष्टं ज्ञानं वर्तते।

**हरिकृष्णः** — किं किं विशिष्टं ज्ञानम्?

**रमणः** — विशिष्टज्ञानम् एव विज्ञानम्। माहेश्वरसूत्रेषु स्वरविज्ञानम्, पाणिनीयसूत्रेषु गणितविज्ञानञ्च विद्यते।

**हरिकृष्णः** — भ्रातः! तर्हि पाणिनीयं व्याकरणं प्राचीनं विश्वप्रसिद्धं भारतीयं विज्ञानं खलु।

**रमणः** — सत्यं प्रोक्तम्। अतः तं विश्वप्रसिद्ध-व्याकरणसूत्रप्रणेतारं महर्षिं पाणिनिं भारतीयाः विदेशीयाश्च विज्ञानिनः सर्वदा स्मरन्ति नमन्ति च।

वयमपि शिरसा नमामः मनसा स्मरामः च —

येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥

## शब्दार्थाः

| | | | | | |
|---|---|---|---|---|---|
| नियमानाम् | = | नियमों के | व्याकरणस्य | = | व्याकरण के |
| अष्ट | = | आठ | चत्वारः | = | चार |
| आहत्य | = | मिलाकर | अग्रजः | = | बड़ा भाई |
| विश्वविख्यातम् | = | विश्वप्रसिद्ध | पर्यन्तम् | = | तक |
| वैयाकरणः | = | व्याकरण के ज्ञाता | | | |

## अभ्यासः

**1. एकपदेन उत्तरं लिखत–**

(क) हरिकृष्णस्य भ्राता किं पठति?

(ख) अष्टाध्यायिग्रन्थे कति अध्यायाः सन्ति?

(ग) पाणिनेः पितुः नाम किम्?

(घ) माहेश्वरसूत्रेषु किं विज्ञानम् अस्ति?

(ङ) शलातुरग्रामः कुत्र अस्ति?

**2. एकवाक्येन उत्तरं लिखत–**

(क) पाणिनिः कः?

(ख) त्रयः मुनयः के?

(ग) पाणिनेः जन्मस्थानं किम्?

(घ) पाणिनेः कालः कः?

**3. उचितं मेलनं कुरुत–**

| | (अ) | (ब) |
|---|---|---|
| (क) | सूत्रकारः | अष्टाध्याय्याम् |
| (ख) | भाष्यकारः | पाणिनिः |
| (ग) | वाक्यकारः | पतञ्जलिः |
| (घ) | दाक्षी | वररुचिः |
| (ङ) | ४००० सूत्राणि | पाणिनेः माता |

**4. कोष्ठकपदानि उपयुज्य रिक्तस्थानानि पूरयत–**

(चत्वारः, ढक्कातः, पाणिनिः, तक्षशिला, व्याकरणं)

(क) व्याकरणनियमानां रचयिता ..................।

(ख) .................. विश्वविख्यातम् अध्ययनकेन्द्रमासीत्।

(ग) प्रत्येकस्मिन् अध्याये .................. पादाः सन्ति।

(घ) कृत्स्नं .............. प्रोक्तं तस्मै पाणिनये नमः।

(ङ) ताण्डवसमये महेश्वरस्य ............. एतानि सूत्राणि निस्सृतानि।

**5. युक्तं लिखत–**

(क) विशिष्टं ज्ञानम् – ............................

(ख) पाणेः पुत्रः – ............................

(ग) महेश्वरादागतानि सूत्राणि – ............................

(घ) अष्ट अध्यायाः अत्र सन्तीति – ............................

(ङ) पाणिनिः वररुचिः, पतञ्जलिः – ............................

## योग्यताविस्तारः –

- **कण्ठस्थीकुरुत –**

  वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम्।
  पाणिनिं सूत्रकारञ्च प्रणतोऽस्मि मुनित्रयम्।।

  योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन।
  योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि।

- अ इ उ ण् ॥1॥ ऋ लृ क् ॥2॥ ए ओ ङ् ॥3॥ ऐ औ च् ॥4॥ ह य व र ट् ॥5॥
  ल ण् ॥6॥ ञ म ङ ण न म् ॥7॥ झ भ ञ् ॥8॥ घ ढ ध ष् ॥9॥
  ज ब ग ड द श् ॥10॥ ख फ छ ठ थ च ट त व् ॥11॥ क प य् ॥12॥
  श ष स र् ॥13॥ हल् ॥14॥ इति माहेश्वराणि सूत्राणि।

- भाष्यकारस्य पतञ्जलेः जीवन-जन्मस्थानादिविषये आचार्यसाहाय्येन जानन्तु।

*मुखं व्याकरणं स्मृतम्।*